# B.A. 6th Semester (Programme) Examination, 2021

## SANSKRIT

**Course ID: 60914** **Course Code: APSNS 603GE-2**

**Course Title: Comprehension & Writing skill**

**Time: 2 Hours** **Full Marks: 40**

*The figures in the margin indicate full marks.*

**1.** अधोलिखितेषु एकः प्रश्नः समाधेयः। **10X1=10**
**নিম্নলিখিত প্রশ্নগুলির মধ্যে যে কোনো একটি প্রশ্নের উত্তর লেখ|**

a) 'तव प्रियः कविः' इति विषयमाश्रित्य निबन्धः रचनीयः।

b) 'परोपकारः' इति विषयमाश्रित्य निबन्धः रचनीयः।

c) अधोलिखितस्य गद्यस्य सारांशः लेख्यः।

अस्ति कस्यचित् सरोवरस्य तीरे महान् पिप्पलवृक्षः। तस्य शाखासु पक्षिणो वसन्ति, तस्य फलानि च खादन्ति। एकदा केचिद् वानरास्तत्रागताः। तदैव महती वृष्टिरभवत्। ततो वानरान् तरुतले शीतार्तान् कम्पमानान् विलोक्य पक्षिभिरुक्तम् – "भो भो वानराः! वयं चञ्च्वा तृणानि आहृत्य नीड़ान् रचयित्वा सुखे वसामः। हस्तपदादियुक्ता अपि यूयं किमेवम् अवसीदथ?" तदाकर्ण्य वानरैर्जातामर्षैरालोचितम् – "अहो नीड़ेषु सुखेन स्थिताः पक्षिणः अस्मान् निन्दन्ति। तद् भवतु तावद् वृष्टेरुपशामः।" अथ शान्ते पानीयवर्षे तैर्वानरैर्वृक्षमारुह्य सर्वे नीड़ा भग्नाः, तेषामण्डानि च अधः पतितानि।

**2.** अधोलिखितेषु परिच्छेदेषु यथेच्छं द्वयोः परिच्छेदयोः प्रश्नानाम् उत्तराणि लिख्यन्ताम्। 5x2=10
**নিম্নলিখিত পরিচ্ছেদগুলির মধ্যে যে কোন দুটি পরিচ্ছেদের প্রশ্নগুলির উত্তর লেখ|**

a) अस्ति कस्मिंश्चिदधिष्ठाने जीर्णधनो नाम वणिक्पुत्रः। स च विभवक्षयाद्देशान्तरगमनमना आसीत्। तस्य गृहे लौहभारघटिता पूर्वपुरुषोपार्जिता तुलासीत्। तां च कस्यचित् वणिजः गृहे निक्षेपभूतां कृत्वा स देशान्तरं प्रस्थितः। ततः सुचिरं कालं देशान्तरं भ्रमित्वा पुनः स्वपुरमागत्य तं श्रेष्ठिनमुवाच – भोः श्रेष्ठिन्, दीयतां मे सा निक्षेपतुला। स आह – भोः, नास्ति सा, त्वदीयतुला मूषिकैर्भक्षितेति। जीर्णधन आह – भोः श्रेष्ठिन् नास्ति दोषस्ते यदि मूषिकैर्भक्षितेति।

i. जीर्णधनः कः आसीत्?

ii. "स च विभवक्षयाद्देशान्तर....." अत्र 'स' पदेन कः सूचितः?

iii. जीर्णधनः देशान्तरगमनात् प्राक् किं कृतवान्?

iv. ”भोः श्रेष्ठिन् , दीयतां मे सा निक्षेपतुला।” कस्य इयमुक्तिः?

v. वणिजः मते निक्षिप्ततुला कैः भक्षिता ?

b) भारतस्य चतुर्षु स्थानेषु कुम्भमेलाः आयोज्यन्ते – प्रयागे , हरिद्वारे , उज्जयिन्यां , नासिके च । एतानि चत्वारि नगराणि चतसृणां प्रमुखानां नदीनां तीरेषु अवस्थितानि सन्ति। एषु प्रथमः तीर्थराजः प्रयागः तिसृणां पवित्रनदीनां सङ्गमस्थले अवस्थितः । तासु तिसृषु नदीषु द्वे नद्यौ गङ्गायमुने प्रयागे एव परस्परं मिलतः । तृतीया नदी सरस्वती विलुप्ता अस्ति । सा उपरि न दृश्यते । द्वितीयं हरिद्वारं गङ्गानदीतटे राजते । तृतीया नगरी उज्जयिनी शिप्रानद्याः तीरे वर्तते , तथा चतुर्थं नासिकनगरं गोदावरीनदीकूले अस्ति।

i. का नदी विलुप्ता ?

ii. गोदावरीकूले किं नगरम् अस्ति ?

iii. उज्जयिनी नगरी कुत्रास्ति ?

iv. हरिद्वारं कुत्र राजते ?

v. तीर्थराजः प्रयागः कुत्र अवस्थितः ?

c) प्राचीने भारते मगधजनपदे नन्दवंशस्य साम्राज्यम् आसीत् । तस्मिन् राज्ये बुद्धिमन्तः मन्त्रिणः कर्तव्यनिष्ठाः कर्मचारिणः च राज्ञः साहाय्यं कुर्वन्ति स्म । मगधसाम्राज्यस्य सभायां गुणवन्तः चिन्तनशीलाः ज्ञानिनश्च पण्डिताः आसन् । ते विद्वांसः समदर्शिनः आसन् । अतः न्यायव्यवस्था अतीव समीचीना आसीत् । तस्मिन् राज्ये शक्तिमन्तः सैनिकाः दीर्घकायाः वीराश्च आसन् । तैः तत्र अश्वशालायां श्वेतेभ्यः कृष्णेभ्यः रक्तेभ्यः विचित्रवर्णेभ्यः च बलिष्ठेभ्यः अश्वेभ्यः युद्धप्रशिक्षणं दीयते स्म । नगरस्य वैभवमपि उत्कृष्टमासीत् । तत्र उन्नतं दीर्घञ्च भवनं, सुन्दरं सुरम्यं मनोहरं च उद्यानं , विशालः तडागः , सुदीर्घः राजमार्गः च नगरस्य शोभां वर्धयन्ति स्म।

i. मगधजनपदे कस्य वंशस्य साम्राज्यम् आसीत् ?

ii. राज्ञः मन्त्रिणः कीदृशाः आसन् ?

iii. सैनिकाः कीदृशाः आसन् ?

iv. नगरस्य शोभा आलोच्यताम् ।

v. सैनिकाः केभ्यः युद्धप्रशिक्षणं यच्छन्ति स्म ?

**3.** यथेच्छमेकस्य संस्कृतभाषया देवनागरलिप्या च अनुवादः कार्यः।  5x1=5

**যে কোন একটির সংস্কৃতভাষা ও দেবনাগরী লিপিতে অনুবাদ কর।**

**i.** **পৃথিবীর প্রাচীন ভাষাগুলির মধ্যে সংস্কৃত অন্যতম। এটি ভারতীয় সংস্কৃতির ধারক ও বাহক। রামায়ণ ও মহাভারত নামক মহাকাব্য দুটি এই ভাষাতেই রচিত। প্রধান প্রধান ভারতীয় ভাষার জননী হল এই সংস্কৃত ভাষা। তাই এই ভাষা অবশ্যই শিখতে হবে।**

**ii.** **প্রাচীনকালে অযোধ্যায় দশরথ নামে এক রাজা ছিলেন। তার তিনজন স্ত্রী ও চারটি পুত্র ছিল। পুত্রদের মধ্যে রামই ছিলেন বড়। তিনি পিতৃসত্য পালনের জন্য বনবাসে গিয়েছিলেন। পত্নী সীতা ও ভ্রাতা লক্ষণ তাঁর সঙ্গে গিয়েছিলেন।**

**iii.** **জন্মের পর শকুন্তলাকে তার মা এক গভীর বনে পরিত্যাগ করেন। মহর্ষি কণ্ব সেখানে তাকে দেখতে পান। তিনি স্নেহবশত তাকে আশ্রমে নিয়ে যান। সেই আশ্রমে অনসূয়া ও প্রিয়ংবদা নামে অন্য দুই মুনিকন্যা ছিল। এই তিন বালিকা মালিনী নদীর তীরে খেলা করত।**

**4.** अधोलिखितेषु अव्ययपदेषु यथेच्छं पञ्चकेन वाक्यानि रचनीयानि।  5x1=5

**নিম্নলিখিত অব্যয়পদগুলির মধ্যে যে কোন পাচটির দ্বারা বাক্য রচনা কর।**

i. कुत्र
ii. इदानीम्
iii. नक्तम्
iv. वृथा
v. यदा
vi. अत्र
vii. अधुना
viii. अथ

**5.** यथेच्छं पञ्चकस्य परिनिष्ठितरूपं लेख्यम्।  2x5=10

**যে কোন পাঁচটির পরিনিষ্ঠিত রূপ লেখ।**

i. भुज् + क्तिन्
ii. अग्नि + ढक्
iii. कुम्भ + कृ + अण्
iv. कृ + ण्यत्
v. इष + क्त
vi. दृश् + तुमुन्
vii. पच् + घञ्
viii. गम् + क्तिन्